

# ८ ईश्वरे अनुरागः

भवन्तः पूजां भजनं कीर्तनं वा कुर्वतः अथवा काव्यावलीं गायतः अथवा मौनं भूत्वा ईश्वरस्य नाम जपतः च जनान् दृष्टवन्तः स्युः। भवद्भिः एतत् अपि अवधारितं स्यात् यत् तेषु केचन तु एतावन्तः मग्नाः भवन्ति यत् तेषां नेत्रयोः अश्रूणि आयान्ति। ईश्वरं प्रति एतादृशः प्रेमभावः अथवा अगाधभक्तिः तेषां विविधप्रकारकाणां भक्तेः आन्दोलनानां तथा च सूफी-आन्दोलनानां योगदानम् अस्ति, येषाम् अष्टमशताब्दीतः उद्भवः आरब्धः आसीत् ।

## परमेश्वर-सम्बद्धः विचारः

विशालतमानां राज्यानाम् उद्भवात् प्राक् विभिन्नानां समूहानां जनाः स्वस्य देवीनां देवतानां च पूजां कुर्वन्ति स्म । यदा जनाः नगराणां विकासेन वाणिज्यस्य तथा च साम्राज्यानां माध्यमेन परस्परं निकटे आगताः तदा नूतनानां विचाराणां विकासः आरब्धः। अयं विषयः व्यापकरूपेण अङ्गीक्रियमाणः आसीत् यत् सर्वे जीवधारिणः उत्तमानि तथा च अनुत्तमानि कर्माणि कुर्वन्तः जीवन-मरणस्य तथा च पुनर्जीवनस्य अनन्तचक्रैः गमनं कुर्वन्ति । तस्मिन् काले अयं विचारः अपि समानान्तररूपेण जनमानसेषु उत्पन्नः अभवत् यत् सर्वे जनाः जन्मसमये समानाः न भवन्ति। इयं धारणा आसीत् यत् सामाजिक-विशेषाधिकाराः कस्मिंश्चित् उच्चकुटुम्बे अथवा उच्चजात्याम् उत्पन्नतायाः कारणेन लभ्यन्ते, अनेकेषां पाण्डित्यपूर्णानां ग्रन्थानां विषयः आसीत्। अनेके जनाः ईदृशैः विचारैः भ्रमिताः आसन् । अतः ते बुद्धस्य तथा च जैनानाम् उपदेशान् प्रति उन्मुखाः अभवन् । येषाम् अनुसारेण व्यक्तिगत-प्रयासैः सामाजिकम् अन्तरं दूरीकर्तुं शक्यते। तथा च पुनर्जन्मनः चक्रात् मुक्तिः प्राप्तुं शक्यते। केचन अन्ये जनाः परमेश्वर-सम्बद्धात् अस्मात् विचारात् आकर्षिताः अपि अभवन् यत् यदि मनुष्यः भक्तिभावेन परमेश्वरस्य शरणं गच्छेत्, तर्हि परमेश्वरः व्यक्तिम् एतस्मात् बन्धनात् मुक्तिं दातुं शक्नोति। श्रीमद्भगवद्गीतायां व्यक्तः अयं विचारः सामान्यतया प्रथमख्रिस्ताब्दस्य प्रारम्भिक-शताब्देषु लोकप्रियः अभवत् । विशदां धार्मिकानाम् अनुष्ठानानां माध्यमेन शिवस्य विष्णोः दुर्गायाः च परं देवी-देवतारूपेण पूजनस्य आरम्भः अभवत्। सह एव विभिन्नेषु क्षेत्रेषु पूज्यमानाः देवीः देवताः च शिव-विष्णु-दुर्गादीनां रूपाणि सन्ति इति मन्यते स्म। अनया प्रक्रियया स्थानीयाः काल्पनिक-कथाः प्रसिद्धजनाः च पौराणिक-

कथानां विषयाः अभवन् । पुराणेषु पूजायाः यासां पद्धतीनाम् अनुशंसा कृता आसीत्, तासाम् आचरणं स्थानीयस्तरे अपि आरभत । कालेन पुराणेषु अपि अस्य विषयस्य उल्लेखः कृतः वर्तते यत् भक्तः स्यात् नाम कस्यापि जातेः, सः यथार्थभक्त्या ईश्वरस्य कृपां प्राप्तुं शक्नोति । भक्तेः विचारधारा एतावती अधिका लोकप्रिया आसीत्, यत् बौद्धाः तथा च जैनमतानुयायिनः अपि एतान् विश्वासान् अपालयन् ।



*चित्रम् १*
*भगवद्गीतायाः कस्याश्चित्दक्षिण-भारतीय-पाण्डुलिप्याः स्वीकृतं पृष्ठम्*

## दक्षिणभारते भक्त्याः कश्चन नूतनः प्रकारः- नयनारः तथा च अलवारः

सप्तमशताब्दीतः नवमशताब्द्याः मध्ये केषाञ्चित् नूतनानां धार्मिकस्य आन्दोलनस्य प्रादुर्भावः अभवत् । एतेषाम् आन्दोलनानां नेतृत्वं नयनारैः (शिवोपासकैः) तथा च अलवारैः (विष्णवोपासकैः) कृतम् । एते उपासकजनाः सर्वासां जातीनाम् आसन् । येषु "पुलैया" तथा च "पनार" इति अस्पृश्य-मन्यमानानां जातीनां जनाः अपि सम्मिलिताः आसन् । ते बौद्धानां जैनानां च कटु-आलोचकाः आसन् । तथा च शिवं तथा च विष्णुं प्रति यथार्थप्रेम मुक्तेः मार्गं कथयन्ति । तैः सङ्गमसाहित्ये (तमिल-साहित्यस्य प्राचीनतमम् उदाहरणं तथा च सामान्यतया सन् अर्थात् ईसवी-सन् इत्यस्य प्रारम्भिक-शताब्दे रचितम्) समाहितस्य स्नेहस्य शूरवीरतायाः च आदर्शान् अङ्गीकृत्य भक्तेः मूल्येषु तेषां समावेशः कृतः आसीत् । नयनाराः तथा च अलवाराः भ्रमणशीलाः साधवः सन्यासिनः च आसन् । यत् किमपि स्थानं ग्रामं वा गच्छन्ति स्म, तत्रत्यानां स्थानीयानां देवीनां देवानां च प्रशंसायां सुन्दरकविताः रचयित्वा ताः सङ्गीतबद्धाः कुर्वन्ति स्म ।

**?**

*अद्य अपि भवन्तः स्थानीय-काल्पिनककथानां तथा च प्रसिद्धजनानाम् एतस्याः प्रक्रियायाः कृते व्यापकीं स्वीकृतिं प्राप्नुवन्तः द्रष्टुं शक्नुवन्ति । किं भवन्तः स्वस्य समीपम् एतादृशानि कानिचन उदाहरणानि अन्वेष्टुं शक्नुवन्ति ।*

**धार्मिक-जीवनपरिचय-सन्त-**जीवनपरिचय-लेखनं च

## नयनारः तथा च अलवारः

*कुम्भकाराः 'अस्पृश्याः' कर्मकराः, कृषकाः, आखेटकाः, सैनिकाः, ब्राह्मणाः तथा च ग्रामप्रधानाः इति आहत्य ६३ नयनाराः आसन् ये विधजातिसम्बद्धाः आसन्। तेषु अप्पारः संबन्दरः सुन्दररः माणिक्कवसागारः च सर्वाधिकाः प्रसिद्धाः आसन्। तेषां गीतानां सङ्कलनद्वयम् – तेवरम् तथा च तिरुवाचकम् इति आसीत्*

*अलवार-भक्ताः सङ्ख्यायां १२ आसन्। ते अपि विभिन्नाभ्यः जातिभ्यः सम्बद्धाः आसन्। तेषु सर्वाधिकाः प्रसिद्धाः आसन्-पेरियअलवारः, तस्य पुत्री अण्डाला, तोण्डरडिप्पोडी अलवारः तथा च नम्मालवारः। तेषां गीतानि दिव्यप्रबन्धे सङ्कलितानि आसन्।*

दशमशताब्दीतः द्वादशशताब्दीं यावत् चोलैः तथा च पाण्डयन-राजभिः तेषु अनेकेषु धार्मिकेषु स्थलेषु विशालानि मन्दिराणि निर्मापितानि, यत्र भक्तैः कविभिः च यात्रा कृता। एवं प्रकारेण भक्तिपरम्परायाः तथा च मन्दिरपरम्परायाः मध्ये दृढसम्बन्धाः स्थापिताः अभवन्। अयम् एव सः कालः आसीत् यदा तेषां कवितानां सङ्कलनं सज्जीकृतम् आसीत्। एतत् अतिरिच्य अलवाराणां तथा च नयनार-भक्तानां **धार्मिक-जीवनरचनाः** अपि रचिताः। अद्य वयं भक्तिपरम्परायाः इतिहासलेखने एतासां जीवनरचनानां स्रोतसः रूपेण उपयोगं कुर्मः।

**चित्रम् २**

*माणिक्कवसागारस्य कांस्य-प्रतिमा*



## भक्तः भगवान् च

***माणिक्कवसागारस्य एका रचना :***

***मम अस्थि-मासयुतायाम् अस्यां घृणित-प्रतिकृतौ***
***त्वम् आयातः यथा किञ्चन सुवर्णमन्दिरं भवेत्,***
***मम कृपालुः प्रभुः मम विशुद्धरतम्,***
***त्वं मां सान्त्वनां प्रदाय अरक्षत्।***
***त्वया मम दुःखम्, मम जन्ममृत्योः कष्टं माया मोहः च***
***अपाकृतः अहं च मोचितः।***
***हे ब्रह्मानन्द, हे प्रकाशमय मया तव शरणं स्वीकृतम्***
***अहं च त्वत्तः कदापि दूरं भवितुं न शक्नोमि।***

?

***कविना भगवता सह स्वस्य संबन्धस्य कीदृशं वर्णनं कृतम् अस्ति ?***

## दर्शनं भक्तिः च

भारतस्य सर्वाधिकेषु प्रभावशालिषु दार्शनिकेषु अन्यतमस्य शङ्करस्य जन्म अष्टमशताब्द्यां केरलप्रदेशे अभवत्। असौ अद्वैतवादस्य समर्थकः आसीत् यस्य अनुसारं जीवात्मा तथा च परमात्मा (यत् परं सत्यं वर्तते) द्वौ अपि एकरूपम् एव वर्तेते। असौ इमाम् एव शिक्षाम् दत्तवान् यत् ब्रह्म यत् एकमात्रम् अथवा परं सत्यम् अस्ति। सः निर्गुणः तथा च निराकारः वर्तते। शङ्करः अस्मान् परितः यः संसारः सः मिथ्या अथवा माया अस्ति इति मत्तवान् तथा च संसारस्य परित्यागकरणाय अर्थात् संन्यासस्वीकरणाय तथा च ब्रह्मणः समुचितां प्रकृतिम् अवगन्तुं मोक्षप्राप्तर्थं ज्ञानमार्गस्य आचरणस्य उपदेशं दत्तवान्।

रामानुजः एकादश्यां शताब्दौ तमिल्नाडुराज्ये उत्पन्नः अभवत्। असौ विष्णुभक्तेभ्यः अलवारभक्तेभ्यः अतीव प्रभावितः आसीत्। तेषाम् अनुसारं मोक्षप्राप्तेः उपायः विष्णुं प्रति अनन्यभक्ति-भावस्य स्थापनं वर्तते। भगवतः विष्णोः कृपादृष्ट्या भक्तः तेन सह एकाकारस्य परमानन्दं प्राप्तुं शक्नोति। रामानुजः विशिष्टताद्वैतस्य सिद्धान्तं प्रतिपादितवान् यस्य अनुसारम् आत्मा परमात्मना सह युक्तेः परम् अपि पृथक् सत्तां धारयति। रामानुजस्य सिद्धान्तः भक्तेः नवीनां धाराम् अतीव प्रेरिताम् अकरोत्। या परवर्तिकाले उत्तरभारते विकसिता अभवत्।

?

शङ्करस्य अथवा रामानुजस्य विचाराणां विषये किञ्चित् अधिकं ज्ञातुं प्रयत्नं कुर्वन्तु।

## बसवन्नः वीरशैववादः

अस्माभिः पूर्वं पठितं यत् तमिल-भक्ति-आन्दोलनस्य तथा च मन्दिरपूजायाः मध्ये के सम्बन्धाः आसन्। एतस्य परिणामतः या प्रतिक्रिया अभवत्, सा बसवन्ना तथा च अल्लमाप्रभोः तथा च अक्कमहादेवीसदृशैः तस्य सहचरैः आरब्धे वीरशैव-आन्दोलने स्पष्टतः दृश्यते। एतत् आन्दोलनं द्वादशशताब्द्याः मध्ये कर्णाटके प्रारब्धम् आसीत्। वीरशैवैः सर्वेषां जनानां समानतायाः पक्षे एवञ्च जातिं नारीं प्रति व्यवहारस्य विषये ब्राह्मणवादीन्याः विचारधारायाः विरुद्धं स्वस्य प्रबलाः तर्काः प्रस्तुताः आसन्। किञ्च ते सर्वविधानां कर्मकाण्डानां तथा च मूर्तिपूजायाः विरोधिनः आसन्।

वीरशैवानां वचनानि

*अधः कतिचन वचनानि कथनानि च प्रदत्तानि सन्ति, यानि बसवन्नायाः सन्ति इति सूच्यन्ते :*

*धनिकाः जनाः*
*शिवाय मन्दिरं निर्मान्ति ।*
*अहम्*
*निर्धनः जनः किं करिष्यामि ?*
*मम जङ्घा स्तम्भाः- सन्ति,*
*शरीरं तीर्थं मन्दिरं वर्तते,*
*शिरः तस्य सुवर्णनिर्मितं छत्रं वर्तते ।*
*किञ्चिद् शृण्वन्तु, नदीसङ्गमस्य प्रभो!, स्थितानि वस्तूनि कदाचित् पतिष्यन्ति,*
*परन्तु चलन्ति वस्तूनि सदा चलिष्यन्ति ।*

?

*वसन्ना, ईश्वरं किं मन्दिरम् अर्पयन् वर्तते ?*

### महाराष्ट्रस्य महात्मानः

त्रयोदशशताब्दीतः सप्तदशशताब्दीं यावत् महाराष्ट्रे अनेके महात्मकवयः अभवन्, येषां सरलमराठीभाषया लिखितानि गीतानि अद्य अपि जनमनांसि प्रेरयन्ति । तेषु महात्मसु सर्वाधिकाः महत्त्वपूर्णाः आसन् – ज्ञानेश्वरः नामदेवः एकनाथ तुकारामः तथा च सखूबायीसदृश्यः स्त्रियः तथा च चोखामेलायाः कुटुम्बः यः अस्पृश्याः इति मन्यमानायाः महार इति जात्याः आसीत् । भक्तेः इयं क्षेत्रीयपरम्परा पण्ढरपुरे विठ्ठले (विष्णोः एकं रूपम्) एवञ्च जनानां हृदये विराजमानेषु व्यक्तिगतेषु देवसम्बद्धेषु विचारेषु केन्द्रिता आसीत् ।

एतैः सन्यासिभिः कविभिः सर्वविधकर्मकाण्डस्य, पवित्रतायै क्रियमाणानाम् आडम्बराणां जन्मसु आधारितानां सामाजिकानां विभेदानां च विरोधः कृतः । न केवलम् एतावत् एव अपि तु एतैः संन्यासस्य विचाराः अपि उपेक्षिताः तथा च कस्यचित् अपि अन्यव्यक्तेः इव दैनिकान्नं सम्पादयन् कुटुम्बेन सह निवसता विनम्रतापूर्वकम् अपेक्षितसाहाय्यकानां जनानां सेवां कुर्वन् जीवनयापनम् अधिकं वरम् इति अङ्गीकृतम् । तैः एतस्मिन् विषये बलं प्रदत्तं यत् यथार्थभक्तिः अपरेषां दुःखानां वण्टनं वर्तते । अनेन एकस्य नूतनस्य मानवतावादी-विचारस्य उद्भवः अभवत् । यथा सुप्रसिद्धः गुजराती-महात्मा नरसीमेहता अकथयत् – “वैष्णवजन तो तेने कहिए पीर पराई जाने रे” अर्थात् वैष्णवजनाः ते भवन्ति ये अन्येषां दुःखं स्वस्य दुःखम् इव मन्यन्ते तथा च दुःखसमये तेषां साहाय्यं कुर्वन्ति ।

## सामाजिक-व्यवस्थायां प्रश्नचिह्नम्

*एतत् महात्मनः तुकारामस्य 'अभङ्गम्' (मराठि-भक्तिगीतम्) वर्तते :*

*यः दीनान् दुःखितान् च*
*स्वीयान् मन्यते*
*सः एव महात्मा वर्तते*
*यतोहि ईश्वरः तेन सह वर्तते ।*
*सः परित्यक्तां प्रतिव्यक्ति*
*हृदयेन संस्थाप्य संरक्षति*
*सः एकेन दासेन सह अपि*
*पुत्रम् इव व्यवहरति ।*
*तुकारामस्य कथनं वर्तते*
*अहम् एतत् कथयन्*
*कदापि न श्रान्तः भविष्यामि*
*एतादृशः जनः*
*स्वयम् ईश्वरः वर्तते ।*

*अत्र चोखामेलायाः पुत्रेण रचितम् एकम् अभङ्गं दीयमानं वर्तते :*

*त्वया वयं निम्नजातिकाः निर्मिताः*
*मम महाप्रभो, त्वं स्वयम् एतां स्थितिम् अङ्गीकृत्य तु पश्य*
*अस्माभिः आजीवनम् उच्छिष्टं खादनीयं भवति*
*एतदर्थं मम प्रभो त्वयि लज्जा भवितव्या*
*त्वं तु अस्माकं गृहे अखादः*
*त्वम् एतस्मात् कथं निषेधं कर्तुं शक्नोषि ?*

*चोखायाः (पुत्रः) करमामेला पृच्छति*
*त्वया मह्यं जीवनं किमर्थं प्रदत्तम् ?*

?

*एतासु रचनासु अभिव्यक्तायाः सामाजिक-व्यवस्थायाः विचाराणां विषये चर्चां कुर्वन्तु ।*

## नाथपन्थिनः सिद्धाः एवञ्च योगिनः



अस्मिन् काले अनेके एतादृशाः धार्मिकाः समूहाः प्रकटिताः अभवन्, यैः साधारणं तर्कं वितर्कं च आश्रित्य रूढिवादिधर्मस्य कर्मकाण्डस्य एवञ्च कृत्रिमपक्षाणां तथा च समाज-व्यवस्थायाः आलोचना कृता। तेषु नामपन्थिनः सिद्धाचारिणः योगिजनाः च उल्लेखनीयाः सन्ति। तैः संसारत्यागस्य समर्थनं कृतम्। तेषां विचारेण निराकार-सत्यस्य चिन्तनं मननं तथा च तेन सह एकीभवनस्य अनुभूतिः एव मोक्षस्य मार्गः वर्तते। एतदर्थं तैः योगासन-प्राणायाम-चिन्तन-मननसदृशीनां च क्रियाणां माध्यमेन मनसः एवञ्च शरीरस्य कठोरतया प्रशिक्षणस्य आवश्यकतायाः उपरि बलं प्रदत्तम्। एते समूहाः विशेषतया 'निम्ना' इति कथ्यमानासु जातिषु अतीव लोकप्रियाः अभवन्। तैः कृतायाः रूढीवादिधर्मस्य आलोचनया भक्तिमार्गीयधर्माय आधारः निर्मितः, यः अग्रे गत्वा उत्तरभारते लोकप्रिया शक्तिः अभवत्।

*चित्रम् ३*

*अग्रेः समीपं तपस्विनां समूहः*

## इस्लामः तथा च सूफ़ीसम्प्रदायः

महात्मसु तथा च सूफ़ीमहात्मसु अत्यधिका समानता आसीत्, इयम् एतावती आसीत् यत् तैः परस्परं बहूनां विचाराणाम् आदानं प्रदानं च कृतं तथा च तेषाम् अनुसरणम् अपि कृतम्। सूफीमुस्लिमाः रहस्यवादिनः आसन्। ते धर्मस्य बाह्यानि आडम्बराणि अस्वीकुर्वन्तः ईश्वरं प्रति प्रेम तथा च भक्तिः तथा च सर्वान् मनुष्यान् प्रति दयाभावं संस्थापयितुं बलं प्रददति स्म।

इस्लामेन एकेश्वरवादस्य अर्थात् अल्लाहं प्रति पूर्णस्य समर्पणस्य प्रचारः कृतः। मुस्लिम-विद्वद्भिः (उलेमा) 'शरियत' इति नाम्ना कश्चन धार्मिकः अधिनियमः निर्मितः। सूफीजनाः मुस्लिम-धार्मिक-विद्वद्भिः निर्धारित-विशद्-कर्मकाण्डस्य आचार-संहितायाः च बहून् अंशान् न अङ्गीकृतवन्तः। ते ईश्वरेण सह तथा एव युक्ताः भवितुम् इच्छन्ति स्म, यथा कश्चन प्रेमीजनः संसारस्य चिन्ताम् अकृत्वा स्वीयया प्रियतमया सह स्थातुम् इच्छति। संन्यासि-कवीनाम् इव सूफीजनाः अपि स्वीयां भावनां व्यक्तीकर्तुं काव्यरचनां कुर्वन्ति स्म। गद्ये किञ्चन विस्तृतसाहित्यं तथा च बहूनि तथ्यानि कथाः च प्रायः एतेभ्यः सूफी-महात्मभ्यः विकसिताः अभवन्।

मध्य-एशियायाः महत्सु सूफीमहात्मसु गज्जाली-रूसी-सादीनामानि उल्लेखनीयानि सन्ति। नाथपन्थिनः, सिद्धान् योगिनः च इव सूफीजनाः अपि एवम् एव मन्यन्ते यत् संसारं प्रति पृथग् दृष्टिधारणाय अन्तःकरणस्य शिक्षणं पाठनं च शक्यं वर्तते। तैः कस्यचित् औलियायाः तथा च पीरस्य संरक्षणे नामजपः, चिन्तनम्, समा अर्थात् गानम्, रक्स अर्थात् नृत्यम्, नीतिचर्चा, श्वासनियन्त्रणादिभिः प्रशिक्षणस्य विस्तृत-रीतीनां विकासः कृतः। एवं प्रकारेण सूफी-गुरुवंशपरम्पराणां प्रादुर्भावः अभवत्। एतेषु प्रत्येकं परम्पराक्रमः निर्देशानां तथा च धार्मिकक्रियाणां कञ्चन भिन्न-विशिष्टं विधिम् अनुसरति स्म।

पञ्चदशशताब्द्याम् एवञ्च षोड्षशताब्द्यां सूफ़ीवादस्य ऋषिपथः उदयः अभवत्। शेखनुरुदीन वली इति अस्य पथः स्थापनाम् अकरोत्। यः नन्दनर्षिः इति नाम्ना अपि ज्ञायते। काश्मीरस्य जनेषु अस्य प्रभावः अत्यधिकः जातः। ऋषिवत्तुल्येभ्यः महात्मभ्यः समर्पितानि अनेकानि पुण्यभवनानि काश्मीरे सन्ति।



**चित्रम् ४**

**आनन्दिताः यवन-सम्प्रदाय-विशेषाः**

**चित्रम् – ५**
***कुरानस्य पाण्डुलिपिभ्यः स्वीकृतं पृष्ठम् दक्कन, परवर्तिनी पञ्चदश- शताब्दी***

एकादशशताब्दीतः अनेके यवन-सम्प्रदाय-विशेषजनाः मध्य-एशियायाः आगत्य हिन्दुस्ताने वासम् आरब्धवन्तः । देहलीसाम्राज्यस्य स्थापनया सह इयं प्रक्रिया तस्मिन् समये इतोऽपि दृढा अभवत्, यदा उपमहाद्वीपे सर्वत्र अनेकानि विशालानि सूफी-केन्द्राणि विकसितानि । चिश्ती-परम्परा एतासु सर्वासु परम्परासु सर्वाधिकी प्रभावशालिनी आसीत् । अस्याम् औलियायानां काचित् दीर्घपरम्परा आसीत् । यथा अजमेरस्य ख्वाजा-मुइनुद्दीन-चिश्ती, देहल्याः कुत्बउद्दीन-बख्तियार-काकी, पञ्जाबप्रदेशस्य बाबा-फरीदः, देहल्याः ख्वाजा-निजामुद्धीन-औलिया तथा च गुलबर्गस्य बन्दानवाज-गिसुदराजः इत्यादयः।

**खानकाहः**
सूफी-संस्था यत्र सूफी-महात्मानः प्रायेण निवसन्ति अपि।

सूफी-महात्मानः स्वस्य यवन-भिक्षुविहारेषु (खानकाह) विशेषाणां गोष्ठीनाम् आयोजनं कुर्वन्ति स्म। सर्वविधाः भक्तगणाः यवन-भिक्षुविहारान् आगच्छन्ति स्म, येषु राजपरिवाराणां जनाः, अभिजाताः सामान्यजनाः च सम्मिलिताः भवन्ति स्म । ते आध्यात्मिक-विषयेषु चर्चां कुर्वन्ति स्म। स्वस्य सांसारिकीणां समस्यानां समाधानं कर्तुं महात्मभ्यः आशीर्वादं याचन्ते स्म अथवा सङ्गीतस्य तथा च नृत्यस्य उत्सवेषु एव सम्मिलिताः भूत्वा गच्छन्ति स्म।



प्रायेण जनाः एवम् अवगच्छन्ति स्म यत् यवन-सम्प्रदाय-विशेषाः सिद्धानां समीपं चमत्कारिक-शक्तयः भवन्ति, याभिः सामान्यजनाः रोगेभ्यः कष्टेभ्यः च मुक्तिं प्राप्तुं शक्नुवन्ति स्म । सूफी-महात्मनां समाधिस्थलम् (दरगाह) कालेन केनचित् तीर्थस्थलरूपेण प्रसिद्धं भवति स्म, यत्र सर्वेषां धर्माणां जनाः सहस्र- सङ्ख्यासु एकत्रिताः भवन्ति स्म।

**चित्रम् ६**

***सर्वासां पृष्ठभूमीनां भक्ताः, सूफी-मन्दिरेषु गमनं कुर्वन्ति।***

**स्वामिनः(प्रभोः) अन्वेषणम्**

*जलालुद्दीन-रूमी त्रयोदशशताब्द्याः महान् कश्चन सूफ़ीकविः आसीत् । सः ईरानवासी आसीत् तथा च फारसीकाव्यानां रचनाम् अकरोत् । तस्य कृतीनाम् एकम् उद्धरणं प्रस्तुतं वर्तते -*

*सः ईसायीनां शूले (ईसायीनां धार्मिकचिह्नम्) न आसीत् । अहं हिन्दुमन्दिराणि गतवान् । तत्र अपि तस्य नामचिह्नं किमपि न आसीत् । सः न तु उन्नतेषु स्थानेषु न च उपत्यकासु मिलितः ।...अहं मक्कायाः काबाम् अपि गतवान् । सः तत्र न आसीत् । अहं तस्य विषये दार्शनिकम् एविसेन्नाम् अपृच्छम् । सः एविसेन्नायाः प्राप्तेः दूरम् आसीत्.....अहं स्वस्य हृदि ईक्षणम् अकरवम् । इदम् एव तस्य स्थानम् आसीत् । अहं तत्र एव तं प्राप्नुवम् । सः अन्यत्र कुत्रापि न आसीत् ।*

**चित्रम् ७**

*चैतन्यदेवः षोडशशताब्द्याः बङ्गालस्य कश्चन भक्तिमहात्मा आसीत् । असौ राधाकृष्णौ प्रति निष्कामस्य भक्ति-भावस्य उपदेशम् अकरोत् । अस्मिन् चित्रे भवन्तः तेषाम् अनुयायिनः एकसमूहे आनन्दे नृत्यन्तः गायन्तः च द्रष्टुं शक्नुवन्ति ।*

## उत्तरभारते धार्मिकं परिवर्तनम्

त्रयोदशशताब्द्याः अनन्तरम् उत्तरभारते भक्ति-आन्दोलनस्य एका नवीना लहरी आगता । इदं किञ्चन एतादृशं युगम् आसीत्, यदा इस्लामस्य, ब्राह्मणवादि-हिन्दुधर्मस्य, सूफीमतस्य, भक्तेः विविधधाराः तथा च नामपथिनः, सिद्धाः, योगिनः च परस्परम् अन्योन्यं प्रभावितान् अकुर्वन् । अस्माभिः दृष्टं यत् नवीननगराणां तथा च राज्यानाम् (अध्यायः 2, 3 तथा च 4) उद्भवः जायमानः आसीत् । जनाः च स्वस्मै विनूतनान् व्यवसायान् विनूतनाः भूमिकाः च गवेषयन्तः आसन् । एतादृशाः जनाः विशेषरूपेण शिल्पिनः, कृषकाः, वणिजः, कर्मकराः च एतेषां नवीनानां महात्मनां विचारान् श्रोतुम् एकत्रिताः भवन्ति स्म । पुनः ते तेषां प्रचारं कुर्वन्ति स्म । तेषु कबीर-बाबागुरुनानकसदृशैः कैश्चित् महात्मभिः सर्वे आडम्बरपूर्णाः रूढीवादिधर्माः न अङ्गीकृताः । तुलसीदास-सुरदाससदृशैः कैश्चित् अन्यैः महात्मभिः तस्मिन् समये विद्यमानान् विश्वासान् पद्धतीः च स्वीकुर्वद्भिः तान् जनसामान्यं यावत् प्रापणस्य प्रयत्नः कृतः । तुलसीदासः ईश्वरं रामरूपेण अधारयत् । अवधीभाषया लिखिता तुलसीदासस्य *'रामचरितमानसम्'* इति रचनाः तेषां भक्ति-भावस्य अभिव्यक्तिः साहित्यिकी कृतिः च उभयदृष्ट्या अपि महत्त्वपूर्णा वर्तते । सूरदासः श्रीकृष्णस्य अनन्यः भक्तः आसीत् । तस्य रचनाः सूरसागरे सूरसारावल्यां साहित्यलहर्यां च सङ्गृहीताः सन्ति । एवञ्च तेषां भक्तिभावम् अभिव्यञ्जयन्ति ।






**मानचित्रम् १**
मुख्य-भक्ति-महात्मानः तथा च तैः सम्बद्धानि क्षेत्राणि

शङ्करदेवस्य भक्तेः सारः "एक शरण नाम धर्म" (काश्चित् सर्वोच्च-सत्तां प्रति समर्पणम्) इति नाम्ना ज्ञायते। शङ्करदेवस्य शिक्षाः श्रीमद्भगवतगीयाः श्रीमद्भावतपुराणस्य च आधारिताः सन्ति। एषः ज्ञानस्य प्रसाराय सत्राणाम् अथवा मठानां स्थापनं प्रोत्सहितवान्। तस्य प्रमुखतमासु रचनासु "कीर्तनघोषः" अन्यतमा अस्ति।

असमस्य शङ्करदेवः (परवर्तः १५ शताब्द्याम्) यः एतेषां समकालिकः आसीत्, सः विष्णोः भक्तेः महत्त्वं प्रतिपादितवान् असमियाभाषायां कविताः तथा च नाटकानि अलिखत्। असौ 'नामघर' (कवितापाठः तथा च प्रार्थनागृहम्) इति स्थापनस्य पद्धतिम् अचालयत्, या अद्यावधिः अपि प्रचलन्ती वर्तते।

अस्यां परम्परायां दादूदयालः, रविदासः मीराबायीसदृशाः च महात्मानः अपि सम्मिलिताः आसन्। मीराबायी काचित् राजपूत-राजकुमारी आसीत्। यस्याः विवाहः षोडशशताब्द्यां मेवाडस्य कस्मिंश्चित् राजगृहे जातः आसीत्। मीराबायी रविदासस्य अर्थात् यः 'अस्पृश्यजातेः' मन्यते स्म तस्य अनुयायिनी अभवत्। सा कृष्णं प्रति समर्पिता आसीत् तथा च सा स्वीयान् गभीरान् भक्तिभावान् भजनेषु अभिव्यक्तम् अकरोत्। तस्याः गीतैः 'उच्चजातीनाम्' रीति-नियमानां कृते मुक्ततया आह्वानं प्रदत्तं। तथा च एतानि गीतानि राजस्थानस्य गुजरातस्य च साधारणजनेषु कृते अत्यधिकानि लोकप्रियाणि अभवन्। एतेषु अधिकानां विशिष्टम् अभिलक्षणम् एतत् वर्तते यत् एतेषां कृतयः क्षेत्रीयभाषासु रचिताः तथा च एतासां गायनं सरलतया कर्तुं शक्यते स्म। एतदर्थम् एताः

अत्यधिकाः लोकप्रियाः अभवन् तथा च क्रमशः वंशपरम्परया मौखिकरूपेण प्राचलन् । प्रायेण एतासां गीतानां प्रसारणे सर्वाधिक-निर्धनानां सर्वाधिक-वञ्चितस्य समुदायस्य महिलानां च भूमिका आसीत् । प्रसारणस्य अस्यां प्रक्रियायाम् एते सर्वे जनाः प्रायेण स्वस्य अनुभवान् अपि योजयन्ति स्म । एवम् अद्य प्राप्यमाणानि गीतानि महात्मनां रचनाः तु सन्ति एव, युगपदेव तेषां जनानां वंशस्य रचनाः अपि मन्तुं शक्यन्ते, ये एतान् गायन्ति स्म । ताः रचनाः अस्माकं जीवन्त्याः जनसंस्कृतेः अङ्गभूताः अभवन् ।

## राणः राजप्रासादात् परम्




*मीराविरचितं गीतम् -*

*यया लोकप्रतिष्ठा कुलमर्यादा संसारे न रक्षिता*
*प्रासाद-अट्टाली त्यक्तं सर्वम्*
*भवतः हि त्यक्तं निवासनगरम्*
*राणावर्यः न जाने कस्मात् आचरति मयि वैरम्*
*विषचषकः राणा प्रेषितः*
*मया हसन्त्या मीरया पीतः*
*न किमपि जातं तदा यदा विषं मीरया पीतम्*
*राणा न जाने कस्मात् आचरति मयि वैरम्*

?

*भवतां विचारेण मीरा राणायाः राजभवनं किमर्थम् अत्यजत् ?*

चित्रम् ८

मीराबायी

**भक्तिमहात्मनां किमपि महत्त्वपूर्णम् अवदानं सङ्गीतस्य विकासः आसीत् । बङ्गाले जयदेव गीतगोविन्दस्य रचनाम् अकरोत्, यस्मिन् प्रत्येकम् अपि गीतं कस्मिँश्चित् विशिष्टे राग-ताले निबद्धम् अस्ति । एतेषां महात्मनां सङ्गीते प्रभावः भजनस्य कीर्तनस्य अभङ्गस्य च प्रयोगः इति आसीत् । इमानि गीतानि यान् मनोभावात्मकान् अनुभवान् विशेषेण प्रकटयन्ति जनमानसानि अतीव आकर्षयन् ।**

**मानचित्रम् १**

मुख्य-भक्ति-महात्मानः तथा च तैः सम्बद्धानि क्षेत्राणि

## कबीरः - किमपि सूक्ष्मम् ईक्षणम्

कबीरः सम्भवतः पञ्चदश्यां षोडश्यां वा शताब्द्याम् अभवत् । असौ कश्चन अत्यधिकः प्रभावशाली महात्मा आसीत् । तस्य पालनं पोषणं च वाराणस्याम् अथवा एतत् समीपस्थे कस्मिंश्चित् मुस्लिम-तन्तुवायस्य कुटुम्बे अभवत् । तेषां जीवनस्य विषये अस्माकं पार्श्वे न्यूनाः विश्वसनीयाः सूचनाः सन्ति । वयं तस्य विचाराणां विषये "साखी" तथा च "पद" इत्येतयोः विशालसङ्ग्रहेण ज्ञानं प्राप्नुमः, येषां विषये एतत् कथ्यते यत् एतेषां रचना तु कबीरेण कृता आसीत् परन्तु एते भ्रमणशीलैः भजन-गायकैः च गीयन्ते स्म । एतेषु कतिचन भजनानि गुरु-ग्रन्थ-साहबे, पञ्चवाण्यां बीजकेषु च सङ्गृहीतानि सुरक्षितानि सन्ति ।

### *यथार्थस्य ईश्वरस्य अन्वेषणम्*

**कबीरस्य रचना**



*चित्रम् -9 पटनिर्माणगृहे कार्यं कुर्वन् कबीरः*

*अल्लाहः रामः च जीवन्तु भवतां जीवाः*
*भक्तोपरि दयां कुरु मम ईश्वरः*
*किं वा स्वीकुर्यां मृत्तिकायाः*
*किं वा कुर्यां देहस्नानम्*
*ये अस्मान् मसकीनः तुदति*
*गुणान् हि सः गोपयति*
*ब्राह्मणः चतुर्विंशतिम् एकादशीम् आचरति,*
*काजी मरहमः जाँन*
*एकादशमासपृथक् यत् कृतम्*
*एकस्मिन् मासे समानः*
*पूर्वदिशि हरेः वासः*
*पश्चिमदिशि अल्लाहस्य वासः*
*अन्तःकरणम् अन्तःकरणे एव अन्विषेत्*
*अत्र एव रामः रहीमः च*

? *एतेषु पद्येषु प्रदत्ताः विचाराः केन प्रकारेण बसवन्ना तथा च जलालुद्दीन-रूमिणा विचारेण समानतां अथवा भिन्नतां भजन्ते ?*

कबीरस्य उपदेशाः प्रमुख-धार्मिक-परम्पराणां पूर्णायाम् एवं च प्रचण्डायाम् अस्वीकृत्याम् आधारिताः आसन्। तस्य उपदेशेषु ब्राह्मणवादि-हिन्दुधर्मस्य तथा च इस्लामस्य अनयोः द्वयोः अपि बाह्याडम्बरपूर्णायाः पूजायाः सर्वेषां रूपाणां परिहासः कृतः वर्तते। तस्य काव्यस्य भाषा व्यवहारिकी हिन्दीभाषा आसीत्। या सामान्यजनैः सरलतया अधिगन्तुं शक्यते स्म। असौ बहुधा रहस्यमयीभाषायाः प्रयोगम् अकरोत्, यस्याः अवगमनं कठिनम् आसीत्।

कबीरः निराकारे परमेश्वरे विश्वसिति स्म। कबीरः इमम् उपदेशम् अकरोत् यत् भक्तेः माध्यमेन एव मोक्षः अर्थात् मुक्तिः प्राप्तुं शक्या अस्ति। हिन्दुसम्प्रदायः तथा च मुस्लिमसम्प्रदायः द्वौ अपि तस्य अनुयायिनः अभवन्।

## बाबा-गुरुनानकस्य विषये किञ्चित् वर्णनम्

कबीरस्य अपेक्षया बाबा-गुरुनानकस्य (१४६९-१५३९) विषये वयं बहुः अधिकं जानीमः। तलवण्ड्यां (पाकिस्ताने ननकाना-साहबे) जन्मप्राप्तवता बाबा-गुरुनानकेन करतारपुरे (रावीनद्याः तटे डेरा-बाबा-नानके) कस्यचित् केन्द्रस्य स्थापनायाः पूर्वम् अनेकाः यात्राः कृताः। सः स्वस्य अनुयायिनां कृते करतारपुरे एकां नियमिताम् उपासनापद्धतिं निरमापयत्। यस्याः अन्तर्गतं तस्य एव शबद अर्थात् भजनानि गीयन्ते स्म। तस्य अनुयायिनः स्वस्य पूर्वधर्मान् जातिं लिङ्गभेदं च अन्वीक्ष्य एकस्याम् एव पाकशालायां खादन्ति पिबन्ति स्म। इयं व्यवस्था 'लङ्गर' इति कथ्यते स्म। बाबागुरुनानकः उपासनायै तथा च धार्मिककार्याणां कृते यत् स्थानं निश्चितवान् आसीत् तत् 'धर्मसाल' इति कथितः। अद्य एतत् गुरुद्वारा इति कथ्यते।

1539 तमे वर्षे स्वस्य मृत्योः प्राक् गुरुनानकः एकम् अनुयायिनं स्वस्य उत्तराधिकारिरूपेण अचिनोत्। अस्य नाम 'लहणा' इति आसीत्। परन्तु अयं गुरु-अङ्गदनाम्ना प्रसिद्धः अभवत्। 'गुरु-अङ्गद'-नाम्नः महत्त्वम् एतत् आसीत् यत् गुरु-अङ्गदः बाबागुरुनानकस्य एव अङ्गम् इति अमन्यत। गुरु-अङ्गदः बाबा-गुरुनानकस्य रचनानां सङ्ग्रहम् अकरोत् तथा च तस्मिन् सङ्ग्रहे स्वीयाः रचनाः अपि अयोजयत्।



**चित्रम् 10**

*धार्मिकैः महानुभावैः सह चर्चां कुर्वन् बाबा-गुरुनानकः यदा सः युवा आसीत्।*



सङ्ग्रहः कस्याञ्चित् एकस्यां नूतनायाः लिप्यां गुरुमुख्यां लिखितः आसीत् । गुरोः अङ्गदस्य त्रीभिः उत्तराधिकारिभिः अपि स्वरचनाः 'नानक' इति नाम्ना लिखिताः आसन् । गुरुः अर्जुनः एतासां सर्वासां रचनानां सङ्ग्रहः १६०४ तमे वर्षे अकरोत् । अस्मिन् सङ्ग्रहे शेखफरीदस्य, महात्मनः कबीरस्य, भगतनामदेवस्य तथा च गुरुतेगबहादुरसदृशानां सूफ़ीमहात्मनां महात्मनां गुरूणां च वाण्यः योजिताः । १७०६ तमे वर्षे इमं विशालं सङ्ग्रहं गुरोः तेगबहादुरस्य पुत्रः तथा च उत्तराधिकारी गुरुगोबिन्दसिंहः प्रामाणयत् । अद्य अयं सङ्ग्रहः सिखानां पवित्रग्रन्थः अर्थात् गुरुग्रन्थसाहबः इति रूपेण ज्ञायते ।

**चित्रम् ११**

गुरुग्रन्थसाहबस्य एका आरम्भिकी पाण्डुलिपिः

**षोडश्यां शताब्द्यां** बाबागुरुनानकस्य उत्तराधिकारिणां नेतृत्वे तस्य अनुयायिनां सङ्ख्यायाः विस्तारः अभवत् । एते अनुयायिनः अनेकजातिकाः आसन् । परन्तु एतेषु वणिजः कृषकाः शिल्पकाराः च अधिकाः आसन् । अस्य कारणम् एतत् भवितुं शक्यते यत् बाबा-गुरुनानकः अस्मिन् विषये बलं प्रददाति स्म यत् तस्य अनुयायिनः गृहस्थाः स्युः अपि च उपयोगिभिः उत्पादकैः व्यवसायैः च युक्ताः भवेयुः । अनुयायिभिः इयम् आशा अपि क्रियते स्म यत् ते नूतनसमुदायस्य सामान्यकोषे योगदानं करिष्यन्ति ।

सप्तदशशताब्द्याः प्रारम्भे केन्द्रीय-गुरुद्वारा-हरमन्दरसाहबस्य (सुवर्णमन्दिरस्य) समीपं रामदासपुरनगरस्य (अमृतसरः) विकसनम् आरब्धम् । वस्तुतः एतत् नगरं प्रशासने स्वायत्तम् आसीत् । आधुनिकाः इतिहासकाराः अस्य युगस्य सिक्खसमुदायम् 'राज्यस्य अन्तर्गतं राज्यम्' मन्यन्ते । मुगलसम्राट् जहाँगीरः एतं समुदायं सम्भावितं सङ्कटम् इति मन्यते स्म । सः १६०६ तमे वर्षे गुरवे अर्जुनसिंहाय मृत्युदण्डम् आदिशत् । सप्तदशशताब्द्यां सिक्खान्दोलनस्य राजनीतिकरणं प्रारब्धम् । यस्य दूरगामी परिणामः अयम् अभवत् यत् १६९९ तमे वर्षे गुरुगोबिन्दसिंहः खालसायाः संस्थायाः निर्माणम् अकरोत् । 'खालसापन्था' इति नाम्ना प्रसिद्धः सिक्खसमुदायः अधुना काचिद् राजनैतिकी सत्ता अजायत ।

षोडशशतकस्य सप्तदशशतकस्य च परिवर्तमानाः ऐतिहासिक्यः परिस्थितयः सिक्ख-आन्दोलनस्य विकासं प्राभावितवत्यः । आरम्भात् एव बाबागुरुनानकस्य विचाराणां सिक्ख-आन्दोलने महान् प्रभावः अभवत् । सः एकस्य एव ईश्वरस्य उपासनायाः महत्त्वं प्रतिपादितवान् । सः साग्रहपूर्वकम् उपदिष्टवान् यत् जाति-धर्माणां अथवा लिङ्ग-भेदानां मुक्तिप्राप्तये न किञ्चित् महत्त्वम् अस्ति । तस्य कृते मुक्तिः नाम काचिद् निष्क्रियस्य आनन्दस्य प्राप्तिः न अपितु सक्रियरूपेण जीवनयापनेन सह सामाजिक-प्रतिबद्धतायाः सततप्रयत्नेषु एव निहिता आसीत् । तेन स्वस्य उपदेशस्य सारं प्रकटयितुं - नाम, दानम्, स्नानम् इति त्रयाणां शब्दानां प्रयोगः कृतः ।

नाम्ना इत्यस्य अभिप्रायः समुचिता उपासना। दानेन तात्पर्यम् आसीत् अन्येषां हितकरणम्। स्नानेन तात्पर्यम् आचार-विचाराणां पवित्रता। अद्य तेषाम् उपदेशाः नाम-जपनं, किर्त-करणम्, वण्ड-ग्रहणम् इतिरूपेण स्मर्यन्ते। एताः अवधारणाः अपि उचितं विश्वासं तथा च उपासनं विश्वसनीयतापूर्णं निर्वाहकरणम्, संसाधनानां सम्मिल्य प्रयोगकरणम् अर्थात् अन्येषां सहयोगस्य महत्त्वं रेखाङ्कितं कुर्वन्ति। एतादृशं बाबागुरुनानकस्य समानतायाः विचाराणां च सामाजिक-राजनैतिकं च महत्त्वम् आसीत्। प्रायेण अनेन एव अस्माकं कृते बाबागुरुनानकस्य तेषाम् अनुयायिनाम् इतिहासस्य तथा च कबीर-रविदास-दादूसदृशानां च महात्मनां तेषाम् अनुयायिनाम् (येषां विचाराः बाबागुरुनानकस्य विचाराणाम् अतीव समीपस्थाः आसन्) इतिहासे विद्यमानस्य अन्तरस्य अवगमने साहाय्यं प्राप्यते।

**मार्टिन-लूथरः तथा च धर्मपरिष्कार-आन्दोलनम्**

*षोडशशताब्द्यां यूरोपे अपि धार्मिकस्य अन्तःक्षोभस्य अर्थात् ऊहापोहस्य कालः आसीत्। तदा ईसायी - धर्मे अनेकानि परिवर्तनानि अभवन्। येषाम् आनेतारः ये नेतारः आसन् तेषु अन्यतमः आसीत् – मार्टिन-लूथरः (१४८३-१५४६)। लूथरः एतत् अनुभूतवान् यत् रोमन-कैथौलिक-चर्च इत्यस्य अनेके आचाराः व्यवहाराः च बायीबिल-शिक्षायाः विरुद्धाः आसन्। लूथरः लैटिनभाषायाः अपेक्षया सामान्यजनानां भाषायाः प्रयोगाय प्रोत्साहनं दत्तवान् तथा च बायबिलस्य जर्मनभाषायाम् अनुवादं कृतवान्। सः दण्डमोचनस्य तस्याः प्रथायाः विरोधी आसीत्, यस्याः अन्तर्गतं पापकर्माणि क्षमयितुं चर्च इत्यस्य (क्रिस्तमन्दिरस्य) कृते दानं दीयते स्म। मुद्रणालयानां वर्धमानेन प्रयोगेण तस्य रचनानां व्यापकरूपेण प्रचारः प्रसारः च अभवत्। अनेके प्रोटेस्टैण्ट-ईसायी-सम्प्रदायाः स्वस्य उद्भवं लूथरस्य शिक्षायाम् एव अन्विष्यन्ति।*




**चित्रम् – १२**

**मार्टिन-*लूथरद्वारा जर्मनभाषायाम् अनूदितस्य बाइबेलस्य शीर्षक-पृष्ठम्***

## कल्पनां कुर्वन्तु



भवन्तः एकस्मिन् उपवेशने भागग्रहणं कुर्वन्तः सन्ति । यत्र कश्चन महात्मा जातिव्यवस्थायायाः चर्चां कुर्वन् अस्ति । अस्याः चर्चायाः वर्णनं कुर्वन्तु ।

## पुनः स्मरामः -

**बीजशब्दः**

*वीरशैवमतम्,*

*भक्तिः, सूफीः,*

*सूफी-भिक्षुक-*

*विहारः*

१ निम्नलिखितानां मेलनं कुर्वन्तु-

| | |
|---|---|
| बुद्धः | नामगृहम् |
| शङ्करदेवः | विष्णुपूजा |
| निजामुद्दीन-औलिया | सामाजिक-अन्तरेषु प्रश्नाः उत्थापिताः |
| नयनारः | सूफी-महात्मा |
| अलवारः | शिवस्य पूजा |

२ रिक्तस्थानानां पूर्तिं कुर्वन्तु -

क. शङ्करस्य-----------समर्थकाः आसन् ।

ख. रामानुजेन -------------प्रभाविताः अभवन् ।

ग. ---------,---------तथा च ------------ वीरशैवमतस्य समर्थकाः आसन् ।

घ. ---------- महाराष्ट्रे भक्तिपरम्परायाः किमपि महत्त्वपूर्णं केन्द्रम् आसीत् ।

३ नाथपन्थिनां सिद्धानां तथा च योगिनां विश्वासानां तथा च आचाराणां व्यवहाराणां वर्णनं कुर्वन्तु ।

४ कबीरेण अभिव्यक्ताः प्रमुखाः विचाराः के के आसन् ? सः एतान् विचारान् कथम् अभिव्यक्तवान् ?

## आयान्तु, अवगच्छामः

५ सूफ़ीमहात्मनां प्रमुखाः आचाराः व्यवहाराः के आसन् ?

६ भवतां विचारेण बहवः गुरवः तस्मिन् समये प्रचलितान् धार्मिकान् विश्वासान् तथा च प्रथाः किमर्थं न अङ्गीकृतवन्तः ?

७ बाबा-गुरुनानकस्य प्रमुखाः शिक्षाः काः आसन् ?

## विचारं कुर्मः

८ जातिं प्रति वीरशैवानां तथा च महाराष्ट्रस्य महात्मनां दृष्टिः कीदृशी आसीत् ?

९ भवतां विचारेण जनसाधारणः अपि मीरायाः स्मृतिं किमर्थं सुरक्षितम् अस्थापयत् ?

## कृत्वा पश्यामः

१० जानन्तु यत् किं भवतां समीपस्थ-क्षेत्रे भक्तिपरम्परायाः महात्मभिः सम्बद्धं किमपि मुस्लिममन्दिरं, गुरुद्वारम् अथवा मन्दिरं वर्तते । एतेषु किमपि एकं द्रष्टुं गच्छन्तु तथा च सूचयन्तु यत् तत्र भवद्भिः किं दृष्टं किं च श्रुतम् ।

११ अस्मिन् अध्याये अनेकेषां कवीनां रचनानाम् उद्धरणानि प्रदत्तानि सन्ति । तेषां कृतीनां विषये अधिकं जानन्तु तथा च तेषां ताः कविताः अभिलिखन्तु, याः अत्र न प्रदत्ताः सन्ति । जानन्तु यत् किम् एताः गीयन्ते । यदि आं तर्हि कथं गीयन्ते तथा च कवयः एताः कविताः कान् विषयान् अधिकृत्य लिखितवन्तः ।

१२ अस्मिन् अध्याये अनेकेषां महात्मनां कवीनां नाम्नां च उल्लेखः कृतः वर्तते, परन्तु केषाञ्चित् रचनाः अस्मिन् अध्याये सम्मिलिताः न सन्ति । तस्याः भाषायाः विषये अधिकतया जानन्तु, यस्यां भाषायां कवयः स्वकृतीनां रचनाम् अकुर्वन् । किं तेषां रचनाः गीयन्ते स्म ? तेषां रचनानां विषयः कः आसीत् ?